শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধিস্বামি কৃতিষু

# ॥শ্রীহযগ্রীৱস্রগ্ধরা ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TeX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীহযগ্রীৱস্রগ্ধরা ॥

কৱিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

অগ্রে পশ্যামি তেজঃ কিমপি হযমুখং ৱর্ধকং ৱারিরাশেঃ
ৱিদ্যারূপস্য হৃদ্যং ৱিশদশশিনিভং পদ্মজাতাভিনন্দ্যম্।
শঙ্খং চক্রং চ পুস্তং ৱিৱৃতিরতিমতীং জ্ঞানমুদ্রাং চ লক্ষ্মীং
বিভ্রদ্ ৱিভ্রাজমানং শ্রুতিততিমহিতং লোচনানেকদৃশ্যম্॥ ১ ॥

অগ্রে পশ্যামি নিত্যং হযৱদনমহং ধাম মান্যং পৱিত্রং
শীতং ৱিদ্যোতমানং মধুরমতিতমাং মঙ্গলং দর্শনীযম্।
দুগ্ধাম্ভোধেরুদীতাং কমলৱনসখীং লালযদ্বামভাগে
লক্ষ্মীমঙ্কে নিৱিষ্টাং শশিনমধিৱসদ্ দিৱ্যভৱ্যানুভাৱম্॥ ২ ॥

অগ্রে পশ্যামি ভূযঃ ধৱলতমমহং ধাম সর্ৱোত্তমং তত
লক্ষ্ম্যা ৱামাঙ্কভাজা মৃদুলনিজভুজাশ্লিষ্টপৃষ্ঠং ৱরিষ্ঠম্।
ৱাজীন্দ্রাস্যং স্বহেষাৱিধুতনতজনানন্তনানাৱিধাঘং
মানাতীতানুভাৱং মুনিজনমনসাং লক্ষ্যমেকং পৱিত্রম্॥ ৩ ॥

অগ্রে পশ্যামি ভান্তং ধৱলমতিতরাং ৱাজিৱক্ত্রং পুরাণং
যেন প্রেষ্ঠেন কামং জিত ইহ মহসা শীতশুদ্ধেন সোযম্।
নিত্যং ধত্তে নিষণ্ণং নিজসুভগতনৌ দুগ্ধপাথোধিজাতঃ
চন্দ্রোযং দেৱদেৱং ৱিধিৱিহিততপোজাতসঞ্জাতমূর্তিম্॥ ৪ ॥

অগ্রে পশ্যামি নাথং মতিকৃতিৱিহৃতং ৱামভাগাঙ্কভাজা
ৱিদ্যামূর্ত্যা শ্রিযা যঃ করকমলজুষা দিৱ্যসৌরভ্যভাজা।
লীলাপদ্মেন সংৱীজিতনিজৱদনঃ শ্রান্তিহীনো নিতান্তং
নিত্যং ৱেদাংস্তদর্থানপি কিল কথযন্ তং পুমাংসং হযাস্যম্॥ ৫ ॥

দৃগভ্যাং পদ্মাকৃতিভ্যাং দিনকররজনীকান্ততুল্যাকৃতিভ্যাং
চক্রশ্রীশঙ্খরাডভ্যাং ৱিরচিতনিমিষোন্মেষলীলাভরাভ্যাম্।

www.prapatti.com

আভ্যাং দেৱাদিদেৱো হযৱরৱদনো মানুষাকারদেহঃ
সংসারেস্মিন্ চরন্তং হযমিৱ সরযং মানুষং মাং স পাতু॥ ৬ ॥

আস্তামস্মতপুরস্তাদনঘশুভগুণো দেৱদেৱো হযাস্যঃ
হেষাৱিক্ষিপ্ততত্তন্নিমতকলকলো দিৱ্যসৌন্দর্যভূমিঃ।
হত্বা সদ্যসসুদুষ্টং মধুমসুরৱরং ৱেধসঃ কর্ণজাতে
ৱর্ষন্ হর্ষেণ রস্যাঃ মধুমযফণিতীঃ ৱেদৱেদাঙ্গসক্তাঃ॥ ৭ ॥

অঙ্কে কৃত্বা কৃশাঙ্গীং হিমকরনিলযশশঙ্খক্লৃপ্তাভিষেকাং
শীতৈসসংৱেপমানাং ইতরকরগতং দর্শযন্ চক্ররাজম্।
আশ্বাস্যাশ্লিষ্য হেষামযমধুররৱৈর্দেৱদেৱো হযাস্যঃ
নিত্যং মচ্চিত্তরঙ্গে কলযতু নটনং মোদবোধস্বরূপঃ॥ ৮ ॥

ৱেগাত্ প্রত্যূহহীনং জনযিতুমিৱ নসসন্নতানাং মুখেভ্যঃ
ৱাচামুচ্চৈঃ প্রৱাহং ৱিহিতহিতমহাৱাজিৱক্ত্রাৱতারঃ।
শ্রীমান্ ৱাগীশ্বরোযং ধৱলশুভতনুশশুদ্ধসত্ত্বস্বরূপঃ
সত্ত্বং নসসংৱিধত্তাং প্রকটিতকরুণো নীরজো নিস্তমস্কম্॥ ৯ ॥

মন্দোপ্যানন্দপাথোনিধিকুহরগতান্ কর্তুমীষ্টে বুধেন্দ্রান
ৱাচামুচ্চৈর্ৱিলাসৈর্নৱরসভরিতৈশ্শ্রীহযাস্যো যদি স্যাত্।
কিঞ্চিচ্চিত্তে নিৱিষ্টো ৱিমলনিজতনুশশঙ্খচক্রে সপুস্তাং
ৱ্যাখ্যামুদ্রাং চ লক্ষ্মীং করকৃতকমলাং সংৱহন্ সুস্মিতাস্যাম্॥ ১০ ॥

স্রগ্ধরাং শ্রীনিধেরুম্ফিতাং যো ৱহেত
ৱাজিরাজাননং ৱর্ণযন্তীমিমাম্।
স্রগ্ধরাস্রগ্ধরঃ কণ্ঠতোস্মীতি সঃ
ৱাদিরাজাজিতসসজ্জযং ৱিন্দতি॥ ১১ ॥

॥ ইতি শ্রীহযগ্রীৱস্রগ্ধরা সমাপ্তা ॥